# मालवीय मिशन - शिक्षकप्रशिक्षणकार्यक्रमस्य उद्घाटनसमारोहः

कौशलभवनम्, नवदेहली
05/09/2023




नवदेहलीस्थे कौशलभवने UGC इत्यनया शिक्षकदिवसस्य शुभसन्दर्भे मालवीय मिशन इत्यभियानस्य अन्तर्गतत्वेन शिक्षकप्रशिक्षणकार्यक्रमस्य शुभारम्भः अद्य (05/09/2023) कृतः। भारतस्य शिक्षामन्त्री अस्माकं कुलाधिपतिः श्री धर्मेन्द्र प्रधान वर्यः उद्घाटनार्थं समागतः । प्रास्ताविकभाषणं UGC अध्यक्षः प्रो। एम्. जगदीश कुमार वर्यः अकरोत्। तेनोक्तं यत् व्याख्यातृरूपेण IIT Delhi मध्ये यदाहं नियुक्तः तदा कक्ष्यायां चतुराः सार्धैकशतं अभियान्त्रिकविद्यार्थिनः मया सम्मुखीकृताः। अहं क्रमशः छात्राणां निर्वहणकलाम् अभ्यस्तवान्। अधुना तु शिक्षकप्रशिक्षणकार्यक्रमाः शिक्षकान् बहुधा उपकुर्वन्ति कौशलानि अर्जयितुं साहाय्यमाचरन्ति चेति।

उद्घाटनभाषणे माननीयः शिक्षामन्त्री अवदत् यत् "अधुना मालवीय मिशन नाम्ना आरब्धः एषः कार्यक्रमः देशस्य पञ्चदश लक्ष संख्याकेभ्यः प्रशिक्षणं दातुं विरचितः वर्तते। भारते ज्ञानसभ्यता वर्तते। संस्कृतम् - तमिल इत्याद्याः शास्त्रीयभाषाः ज्ञानं प्रसारयन्ति। विश्वस्मिन् ज्ञानाधारितः प्राचीनदेशः नाम भारतम्। NEP 2020 इत्यस्य सम्यक् क्रियान्वयनाय विकसितदेशत्वेन भारतस्य प्रोन्नयनाय च विश्वविद्यालयाः यतेरन्" इति।

अस्मिन् कार्यक्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य विविधानुभागाधिकारिणः शोधच्छात्राश्च कुलपतीनाम् आचार्य श्रीनिवास वरखेडी वर्याणां लिपिबद्धनिर्देशानुसारं कार्यक्रमे भागमगृह्णन्। सन्दर्भेऽस्मिन् UGC संयुक्तसचिवः डा. मन्था श्रीनिवासु वर्यः CSU परिवारसदस्यानां समेषां स्वागतमकरोत्।













डा. गणेश ति. पण्डितः

उपनिदेशकः

प्रकाशनविभागः

के. सं. वि. नवदेहली